चाटुपुष्पाञ्जलिः

श्रीराधिकायै नमः

नवगोरोचनागौरी प्रवरेन्दीवराम्बराम्।
मणिस्तवकविद्योतिवेणीव्यालाङ्गणाफणाम्॥१॥
उपमानघटमानप्रहारिमुखमण्डलाम्।
नवेन्दुनिन्दिभालोद्यत्कस्तुरीतिलकश्रियम्॥२॥
भ्रूजितानङ्गकोदण्डां लोलनीलालकावलिम्।
कज्जलोज्ज्वलताराजच्चकोरीचारुलोचनाम्॥३॥
तिलपुष्पाभनासाग्रविराजद्वरमौलिकाम्।
अधरोद्धूतबन्धूकां कुन्दालीबन्धुरद्विजाम्॥४॥
सरत्नस्वर्णराजीवकर्णिकाकृतकर्णिकाम्।
कस्तूरीबिन्दुचिबुकां रत्नग्रैवेयकोज्ज्वलाम्॥५॥
दिव्याङ्गदपरिष्वङ्गलसद्भुजमृणालिकाम्।
बलारिरत्नवलयकलालम्बिकलाविकाम्॥६॥
रत्नाङ्गुरीयकोल्लासिवराङ्गुलिकराम्बुजाम्।
मनोहरमहाहारविहारिकुचकुट्मलाम्॥७॥
रोमालिभुजगीमूर्धरत्नाभतरलाञ्चिताम्।
वलित्रयीलताबद्धक्षीणभङ्गुरमध्यमाम्॥८॥
मणिसारसनाधारविस्फारश्रोणिरोधसम्।
हेमरम्भामदारम्भस्तम्भनोरुयुगाकृतिम्॥९॥
जानुद्युतिजितक्षुल्लपीतरत्नसमुद्गकाम्।
शरन्नीरजनीराज्यमञ्जीरविरणत्पदाम्॥१०॥
राकेन्दुकोटिसौन्दर्यजैत्रपादनखद्युतिम्।
अष्टाभिः सात्त्विकैर्भावैराकुलीकृतविग्रहाम्॥११॥
मुकुन्दाङ्गकृपापाङ्गामनङ्गोर्मितरङ्गिताम्।

त्वामारब्धश्रियानन्दां वन्दे वृन्दावनेश्वरि ॥१२॥

अयि प्रोद्यन्महाभावमाधुरीविह्वलान्तरे ।

अशेषनायिकावस्थाप्राकट्याद्भुतचेष्टिते ॥१३॥

सर्वमाधुर्यविञ्छोलीनिर्माञ्छितपदाम्बुजे ।

इन्दिरामृग्यसौन्दर्यस्फुरदङ्घ्रिनखाञ्चले ॥१४॥

गोकुलेन्दुमुखीवृन्दसीमन्तोत्तंसमञ्जरि ।

ललितादिसखीयूथजीवातुस्मितकोरके ॥१५॥

चटुलापाङ्गमाधुर्यबिन्दून्मादितमाधवे ।

तातपादयशःस्तोमकैरवानन्दचन्द्रिके ॥१६॥

अपारकरुणापूरपूरितान्तर्मनोह्रदे ।

प्रसीदास्मिन्जने देवि निजदास्यस्पृहाजुषि ॥१७॥

कच्चित्त्वं चाटुपटुना तेन गोष्ठेन्द्रसूनुना ।

प्रार्थ्यमानचपालाङ्गप्रसादा द्रक्ष्यसे मया ॥१८॥

त्वां साधु माधवीपुष्पैर्माधवेन कलाविदा ।

प्रसाध्यमानां स्विद्यन्तीं बीजयिष्याम्यहं कदा ॥१९॥

केलिविस्रंसिनो बककेशवृन्दस्य सुन्दरि ।

संस्काराय कदा देवि जनमेतं निदेक्ष्यसि ॥२०॥

कदा बिम्बोष्ठि ताम्बूलं मया तव मुखाम्बुजे ।

अर्प्यमाणं व्रजाधीशसूनुराच्छिद्य भोक्ष्यते ॥२१॥

व्रजराजकुमारवल्लभाकुलसीमन्तमणि प्रसीद मे ।

परिवारगणस्य ते यथा पदवी मे न दवीयसी भवेत् ॥२२॥

करुणां मुहुरर्थये परं तव वृन्दावनचक्रवर्तिनि ।

अपि केशरिपोर्यथा भवेत्स चटुप्रार्थनभाजनं जनः ॥२३॥

इमं वृन्दावनेश्वर्या जनो यः पठति स्तवम् ।

चाटुपुष्पाञ्जलिं नाम स स्यादस्याः कृपास्पदम् ॥२४॥

इति श्रीरूपगोस्वामिविरचितस्तवमालायां श्रीचाटुपुष्पाञ्जलिः सम्पूर्णः ।